| अथोपपातकानि । | प्रायश्चित्तानि । | तदशक्तौ धेनुदानम् । | तदशक्तौ चूर्णीदानम् । | दक्षिणा । |
|---|---|---|---|---|
| अफलवतामेतेषां छेदनम् । | अष्टाहसाध्यकृच्छ्रम् । | ० | २ कार्षापणौ । | यथाशक्ति । |
| अत्यन्तोत्कृष्टफलवद्वृक्षच्छेदनम् । | चान्द्रायणम् । | ८ धेनवः । | २२॥० कार्षापणाः । | यथाशक्ति । |
| अभ्यासादत्यन्तोत्कृष्टफलवद्वृक्षच्छेदनम् । | आब्दिकव्रतम् । | १५ धेनवः । | ४५कार्षापणाः । | ९ गावः । अशक्तौ ८।/६॥ कार्षापणाः । |
| चैत्यवृक्षश्मशानसीमपुण्यस्थानसुरालयजातवृक्षच्छेदनम् । विंशतिसंख्यकोपजीव्यवृक्षच्छेदनम् । व्यातवृक्षच्छेदनञ्च । | पूर्वोक्तवृक्षच्छेदनप्रायश्चित्तं गुर्व्वादि । सर्वत्र स्त्रीशूद्रबालवृद्धानामर्द्धम् । | | | |
| वापीकूपारामसेतुसभातड़ागवप्रदेवतायतनभेदनम् । | ब्राह्मणेभ्यो निवेद्य चतस्र आहुतीर्जुहुयात् । इदं विष्णुरिति प्रथमां मानस्तोके इति द्वितीयां विष्णोः कर्म्माणीति तृतीयां पादोऽस्याभ्यामिति चतुर्थीं यां देवतामुत्सादयति तस्यै देवतायै । ब्राह्मणान् भोजयेत् । एतत् सकृदल्पोपघातविषयम् । अभ्यासे महोपघाते च प्राजापत्यम् । दण्डश्च । यथा । सकृदल्पोपघाते प्रथमसाहसः २५० पणाः । अभ्यासे महोपघाते उत्तमसाहसः । १००० पणाः । | | | |
| देवताया उत्कृष्टप्रतिमाभेदनच्छेदनदहनहरणानि । | चान्द्रायणम् । वाप्यादिभेदनोक्ताश्चतस्र आहुतयः । उत्तमसाहसो दण्डश्च । १००० पणाः । | सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः । | २२॥० कार्षापणाः । | यथाशक्ति । |
| देवताया अपकृष्टप्रतिमाभेदनच्छेदनदहनहरणानि । | प्राजापत्यम् । पूर्वोक्तचतुराहुत्यादिदानम् । प्रथमसाहसो दण्डश्च । २५० पणाः । | १ धेनुः । | ३ कार्षापणाः । | यथाशक्ति । |
| अथाभिचारः । स तु परहिंसार्थं जपहोमादिकर्म । | अतिकृच्छ्रम् । एतत् सकृदाचरणे । अभ्यासे प्रायश्चित्तावृत्तिः । इति हिंसाप्रायश्चित्तम् ॥*॥ | ३ धेनवः । | ९ कार्षापणाः । | यथाशक्ति । |
| व्रात्ययाजनम् । | प्राजापत्यम् । | १ धेनुः । | ३ कार्षापणाः । | यथाशक्ति । |
| मूल्येन सृतस्य दहनवहनादिकम् । | सान्तपनम् । | २ धेनू । | ६ कार्षापणाः । | यथाशक्ति । |
| अथाभक्ष्यभक्षणम् । अभक्ष्यं षड्विधम् । जातिदुष्टम् १ क्रियादुष्टम् २ कालाश्रयविदूषितम् ३ संसर्गाश्रयदुष्टम् ४ सहृल्लेखम् ५ स्वभावतो दुष्टम् ६ । जातिदुष्टं लशुनगृञ्जनपलाण्डुच्छत्राकश्लेषवार्त्ताकीलालिकावर्त्तुलाकारालावूकम् १ क्रियादुष्टं पतितसंसृष्टम् २ कालदुष्टं पर्य्युषितं चिरसंस्थितञ्च ३ संसर्गदुष्टं सुरालशुनपेयूषादियुक्तम् ४ सहृल्लेखं विचिकित्सितान्नम् ५ स्वभावदुष्टं पुरीषादि ६ । | चान्द्रायणम् । एतद्गुरुतरविषयम् । विशेषानिर्द्देशे ज्ञेयम् । | सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः । | २२॥० कार्षापणाः । | यथाशक्ति । |